# श्रीमन्मणिमञ्जरी
śrīmanmaṇimañjarī

॥ श्री गुरुभ्यो नमः हरिः ॐ॥
|| śrī gurubhyo namaḥ hariḥ om||

## अथ प्रथमः सर्गः
atha prathamaḥ sargaḥ

वन्दे गोविन्दमानन्दज्ञानदेहं पतिं श्रियः।
श्रीमदानन्दतीर्थार्यवल्लभं परमक्षरम्॥ १॥
vande govindamānandajñānadehaṁ patiṁ śriyaḥ |
śrīmadānandatīrthāryavallabhaṁ paramakṣaram || 1||

ससर्ज भगवानादौ त्रीन्गुणान् प्रकृतेः परः।
महत्तत्वं ततो विष्णुः सृष्टवान् ब्रह्मणस्तनुम्॥ २॥
sasarja bhagavānādau trīnguṇān prakṛteḥ paraḥ |
mahattatvaṁ tato viṣṇuḥ sṛṣṭavān brahmaṇastanum || 2||

महत्तत्वादहङ्कारं ससर्ज शिवविग्रहम्।
दैवान्देहान्मनः खानि खं च स त्रिविधात्ततः॥ ३॥
mahattatvādahaṅkāraṁ sasarja śivavigraham |
daivāndehānmanaḥ khāni khaṁ ca sa trividhāttataḥ || 3||

आकाशादसृजद्वायुं वायोस्तेजो व्यजीजनत्।
तेजसः सलिलं तस्मात् पृथिवीमसृजद्विभुः॥ ४॥
ākāśādasṛjadvāyuṁ vāyostejo vyajījanat |
tejasaḥ salilaṁ tasmāt pṛthivīmasṛjadvibhuḥ || 4||

ततः कूटस्थमसृजद्विधिं ब्रह्माण्डविग्रहम्।
तस्मिंस्तु भगवान् भूयो भुवनानि चतुर्दश॥ ५॥
tataḥ kūṭasthamasṛjadvidhiṁ brahmāṇḍavigraham |
tasmiṁstu bhagavān bhūyo bhuvanāni caturdaśa || 5||

तात्विकानथ दैवान् को वैराजः पुरुषोऽसृजत्।
तथैव परमान् हंसान् सनकादींश्च योगिनः॥ ६॥
tātvikānatha daivān ko vairājaḥ puruṣo'sṛjat |
tathaiva paramān haṁsān sanakādīṁśca yoginaḥ || 6||

असुरान् दोषरूपानप्यविद्यां पञ्चपर्वणीम्।
वर्णाश्रमविशेषांश्च धर्मक्लृप्तिं च सोऽसृजत्॥ ७॥
asurān doṣarūpānapyavidyāṁ pañcaparvaṇīm |
varṇāśramaviśeṣāṁśca dharmakḷptiṁ ca so'sṛjat || 7||

मरीच्यत्र्यादयः पुत्रा अभूवन् परमेष्ठिनः।
मरीचेः कश्यपो जज्ञे वामनस्य पिता वटोः॥ ८॥
marīcyatryādayaḥ putrā abhūvan parameṣṭhinaḥ |
marīceḥ kaśyapo jajñe vāmanasya pitā vaṭoḥ || 8||

प्रजाः सिसृक्षुर्विविधा अवहत् कश्यपो दितिम्।
अदितिं च दनुं कद्रुं कीकसां विनतामपि॥ ९॥
prajāḥ sisṛkṣurvividhā avahat kaśyapo ditim |
aditiṁ ca danuṁ kadruṁ kīkasāṁ vinatāmapi || 9||

दित्यां ततोऽभवन् दैत्या अदित्यां च सुराः पुनः।
दनौ तु दानवाः कद्रौ नागा नाना विषोल्बणाः॥ १०॥
dityāṁ tato'bhavan daityā adityāṁ ca surāḥ punaḥ |

danau tu dānavāḥ kadrau nāgā nānā viṣolbaṇāḥ || 10||

कीकसायां यातुधाना विनतायां तु पक्षिणः।
महावीर्याः सुता आसन् कश्यपस्य महात्मनः॥ ११॥
kīkasāyāṁ yātudhānā vinatāyāṁ tu pakṣiṇaḥ |
mahāvīryāḥ sutā āsan kaśyapasya mahātmanaḥ || 11||

मानवानां पिता जज्ञे आदित्यात् कश्यपात्मजात्।
मनुर्नाम महाप्राज्ञ एतन्मन्वन्तरेश्वरः॥ १२॥
mānavānāṁ pitā jajñe ādityāt kaśyapātmajāt |
manurnāma mahāprājña etanmanvantareśvaraḥ || 12||

तस्य घ्राणादभूच्छ्रीमानिक्ष्वाकुः क्षुवतो मनोः।
तपस्तप्त्वा विरिञ्चात्स लेभे रङ्गेश्वरं हरिम्॥ १३॥
tasya ghrāṇādabhūcch□īmānikṣvākuḥ kṣuvato manoḥ |
tapastaptvā viriñcātsa lebhe raṅgeśvaraṁ harim || 13||

विकुक्षिः समभूत्तस्य पुरञ्जयपुरोगमाः।
तदन्वये व्यजायन्त शूरा राजर्षयः परे॥ १४॥
vikukṣiḥ samabhūttasya purañjayapurogamāḥ |
tadanvaye vyajāyanta śūrā rājarṣayaḥ pare || 14||

तस्मिन् वंशे दशरथो बभूवात्यन्तभाग्यवान्।
सोऽर्चन् वैमानिकं विष्णुं ररक्ष महतीं महीम्॥ १५॥
tasmin vaṁśe daśaratho babhūvātyantabhāgyavān |
so'rcan vaimānikaṁ viṣṇuṁ rarakṣa mahatīṁ mahīm || 15||

तस्मिन् काले सुराः सर्वे महाराक्षसपीडिताः।
दुग्धाब्धिशायिनं विष्णुं शरण्यं शरणं ययुः॥ १६॥
tasmin kāle surāḥ sarve mahārākṣasapīḍitāḥ |
dugdhābdhiśāyinaṁ viṣṇuṁ śaraṇyaṁ śaraṇaṁ yayuḥ || 16||

त आदिष्टाः श्रियः पत्या जज्ञिरे क्षितिमण्डले।
शाखामृगादिभावेन हनुमान् मरुतोऽभवत्॥ १७॥
ta ādiṣṭāḥ śriyaḥ patyā jajñire kṣitimaṇḍale |
śākhāmṛgādibhāvena hanumān maruto'bhavat || 17||

अभयाय सतां हत्यै राक्षसानां ततो हरिः।
रामनामा दशरथात् कौसल्यायामजायत॥ १८॥
abhayāya satāṁ hatyai rākṣasānāṁ tato hariḥ |
rāmanāmā daśarathāt kausalyāyāmajāyata || 18||

ततो लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतुः।
कैकेय्यां भरतो जज्ञे सदा शुभरतो नृपात्॥ १९॥
tato lakṣmaṇaśatrughnau sumitrāyāṁ babhūvatuḥ |
kaikeyyāṁ bharato jajñe sadā śubharato nṛpāt || 19||

अभ्यवर्ध्यन्त सम्यञ्चः कुमाराः सुकुमारकाः।
चतुर्भिश्चतुरैः पुत्रैः पितार्थैरिव निर्बभौ॥ २०॥
abhyavardhyanta samyañcaḥ kumārāḥ sukumārakāḥ |
caturbhiścaturaiḥ putraiḥ pitārthairiva nirbabhau || 20||

विश्वामित्रस्ततो यज्ञनिघ्नतो राक्षसेश्वरान्।
निहन्तुमनयन्नाथं रामदेवं सलक्ष्मणम्॥ २१॥
viśvāmitrastato yajñanighnato rākṣaseśvarān |
nihantumanayannāthaṁ rāmadevaṁ salakṣmaṇam || 21||

अटव्यां ताटकां हत्वा स सिद्धाश्रममेयिवान्।
विधूय यज्ञविघ्नांश्च विदेहविषयं ययौ॥ २२॥
aṭavyāṁ tāṭakāṁ hatvā sa siddhāśramameyivān |

vidhūya yajñavighnāṁśca videhaviṣayaṁ yayau || 22||

राजाद्यैः पूजितः सोऽथ विभज्य धनुरैश्वरम्।
जानकीमलभिष्टोच्चैः स्तूयमानः सुरेश्वरैः॥ २३॥
rājādyaiḥ pūjitaḥ so'tha vibhajya dhanuraiśvaram |
jānakīmalabhiṣṭoccaiḥ stūyamānaḥ sureśvaraiḥ || 23||

गच्छन् देव्या सहायोध्यां सवशिष्ठः सहानुजः।
कविकाव्ययुतज्योत्स्नाकान्तवत् स व्यरोचत॥ २४॥
gacchan devyā sahāyodhyāṁ savaśiṣṭhaḥ sahānujaḥ |
kavikāvyayutajyotsnākāntavat sa vyarocata || 24||

प्रविश्य नगरीं तत्र प्रवन्द्य पितरं तथा।
मातॄश्च पूजितः सर्वैः स रेमे सुखचित्तनुः॥ २५॥
praviśya nagarīṁ tatra pravandya pitaraṁ tathā |
mātṝśca pūjitaḥ sarvaiḥ sa reme sukhacittanuḥ || 25||

रामराज्याभिषेकाय दधे्र दशरथो मनः।
निजघ्ने स तु कैकेय्या मत्सुतो गामवेदिति॥ २६॥
rāmarājyābhiṣekāya dadhre daśaratho manaḥ |
nijaghne sa tu kaikeyyā matsuto gāmavediti || 26||

रामदेवः ततः सीतालक्ष्मणाभ्यां समन्वितः।
वनं प्रति ययौ हन्तुमशेषानपि राक्षसान्॥ २७॥
rāmadevaḥ tataḥ sītālakṣmaṇābhyāṁ samanvitaḥ |
vanaṁ prati yayau hantumaśeṣānapi rākṣasān || 27||

ध्वस्तकर्णां विघोणां च कारयामास राक्षसीम्।
लङ्केशभगिनीं रामो लक्ष्मणेनानुजन्मना॥ २८॥
dhvastakarṇāṁ vighoṇāṁ ca kārayāmāsa rākṣasīm |
laṅkeśabhaginīṁ rāmo lakṣmaṇenānujanmanā || 28||

रामविप्रकृतः क्रव्यात् प्रतिकर्मचिकीर्षया।
आजगाम सहानीकः खरो दूषणसंयुतः॥ २९॥
rāmaviprakṛtaḥ kravyāt pratikarmacikīrṣayā |
ājagāma sahānīkaḥ kharo dūṣaṇasaṁyutaḥ || 29||

तान् जघान रमानाथो रामो राजीवलोचनः।
लीलयैव परानन्दः सुरकार्यार्थसिद्धये॥ ३०॥
tān jaghāna ramānātho rāmo rājīvalocanaḥ |
līlayaiva parānandaḥ surakāryārthasiddhaye || 30||

रामः पुरस्तात् परतोऽपि रामो रामः परं दिक्षु विदिक्षु रामः।
रामैरनन्तैरिति विश्वरूपो निघ्नन्नरातीन् विरराज रामः॥ ३१॥
rāmaḥ purastāt parato'pi rāmo rāmaḥ paraṁ dikṣu vidikṣu rāmaḥ |
rāmairanantairiti viśvarūpo nighnannarātīn virarāja rāmaḥ || 31||

॥ इति श्रीमन्मणिमञ्जर्यां प्रथमः सर्गः॥
|| iti śrīmanmaṇimañjaryāṁ prathamaḥ sargaḥ ||

अथ द्वितीयः सर्गः
atha dvitīyaḥ sargaḥ

ततो दूरं गते रामे रावणः सहलक्ष्मणे।
सीतेयं नीयत इति मत्वा निन्ये तदाकृतिम्॥ १॥
tato dūraṁ gate rāme rāvaṇaḥ sahalakṣmaṇe |
sīteyaṁ nīyata iti matvā ninye tadākṛtim || 1||

रामान्तिके स्थिता देवी न मन्दैः समदृश्यत।
रूपान्तरेण कैलासं गता नित्यावियोगिनी॥ २॥

rāmāntike sthitā devī na mandaiḥ samadṛśyata |
rūpāntareṇa kailāsaṁ gatā nityāviyoginī || 2||

नित्यं पश्यन्निजां देवीं पूणर्सन्तोषसम्भृतः।
रामो न दृश्यते देवीत्यभूत् सङ्कटवानिव॥ ३॥
nityaṁ paśyannijāṁ devīṁ pūrṇasantoṣasambhṛtaḥ |
rāmo na dṛśyate devītyabhūt saṅkaṭavāniva || 3||

पर्भञ्जनसुतः श्रीमानाञ्जनेयो निरञ्जनः।
ननाम भक्तिसम्पूणोर् रामं राजीवलोचनम्॥ ४॥
prabhañjanasutaḥ śrīmānāñjaneyo nirañjanaḥ |
nanāma bhaktisampūrṇo rāmaṁ rājīvalocanam || 4||

रामस्वामिन्नमस्तुभ्यं दुष्टान् जहि निजानव।
निदुर्ःखानन्दलीलात्मन्नित्यस्तौत् स निजं गुरुम्॥ ५॥
rāmasvāminnamastubhyaṁ duṣṭān jahi nijānava |
nirduḥkhānandalīlātmannityastaut sa nijaṁ gurum || 5||

स वनान्तरमासाद्य रामः सुगर्ीवमैक्षत।
तेन सख्यं समासाद्य निजघान तदगर्जम्॥ ६॥
sa vanāntaramāsādya rāmaḥ sugrīvamaikṣata |
tena sakhyaṁ samāsādya nijaghāna tadagrajam || 6||

ततः सुगर्ीवसन्दिष्टा वानरा दिक्षु सवर्शः।
पर्ससर्ुनिर्पुणा वीराः सीतामागर्णतत्पराः॥ ७॥
tataḥ sugrīvasandiṣṭā vānarā dikṣu sarvaśaḥ |
prasasrurnipuṇā vīrāḥ sītāmārgaṇatatparāḥ || 7||

दक्षिणां ककुभं गत्वा हनुमानम्भसां निधिम्।
अतिलङ्घ्य ततो लङ्कां सीताकृतिमवैक्षत॥ ८॥
dakṣiṇāṁ kakubhaṁ gatvā hanumānambhasāṁ nidhim |
atilaṅghya tato laṅkāṁ sītākṛtimavaikṣata || 8||

रामाङ्गुलीयकं देव्यै दत्वा चूडामणिं ततः।
सङ्गृह्य जानकीं भक्त्या नत्वासावारुहत्तरुम्॥ ९॥
rāmāṅgulīyakaṁ devyai datvā cūḍāmaṇiṁ tataḥ |
saṅgṛhya jānakīṁ bhaktyā natvāsāvāruhattarum || 9||

वनं विशकलय्योच्चैः राक्षसानक्षपूवर्कान्।
निहत्य मारुतिलर्ङ्कामदहत् पुच्छवह्निना॥ १०॥
vanaṁ viśakalayyoccaiḥ rākṣasānakṣapūrvakān |
nihatya mārutirlaṅkāmadahat pucchavahninā || 10||

ततो रत्नाकरं तीत्वार् वानरेन्दर्ैः सभाजितः।
दत्वा चूडामणिं धन्यः पर्ाप्य रामाय सोऽनमत्॥ ११॥
tato ratnākaraṁ tīrtvā vānarendraiḥ sabhājitaḥ |
datvā cūḍāmaṇiṁ dhanyaḥ prāpya rāmāya so'namat || 11||

रामो हनुमता साधर्ं लक्ष्मणेन च धीमता।
सुगर्ीवेण ससैन्येन कीनाशहरितं ययौ॥ १२॥
rāmo hanumatā sārdhaṁ lakṣmaṇena ca dhīmatā |
sugrīveṇa sasainyena kīnāśaharitaṁ yayau || 12||

स सेतुं दक्षिणाम्भोधौ बन्धयामास मकर्टैः।
ससैन्यो वत्मर्ना तेन नक्तञ्चरपुरं ययौ॥ १३॥
sa setuṁ dakṣiṇāmbhodhau bandhayāmāsa markaṭaiḥ |
sasainyo vartmanā tena naktañcarapuraṁ yayau || 13||

निजघ्नू राक्षसानीकं वानराः सहलक्ष्मणाः।
हनुमान् भगवत्पर्ीत्यै जघानातिबलान् रिपून्॥ १४॥

nijaghnū rākṣasānīkaṁ vānarāḥ sahalakṣmaṇāḥ |
hanumān bhagavatprītyai jaghānātibalān ripūn || 14||

सो जीवयन्महारक्षो मोहितान् सवर्वानरान्।
गन्धमादनमानीय तद्गतौषधिवायुना॥ १५॥
so jīvayanmahārakṣo mohitān sarvavānarān |
gandhamādanamānīya tadgatauṣadhivāyunā || 15||

असङ्ख्यान् राक्षसान् हत्वा कुम्भकणर्ं च रावणम्।
रामो विभीषणं रक्षः सामराज्ये सोऽभ्यषेचयत्॥ १६॥
asaṅkhyān rākṣasān hatvā kumbhakarṇaṁ ca rāvaṇam |
rāmo vibhīṣaṇaṁ rakṣaḥ sāmrājye so'bhyaṣecayat || 16||

अशोकमूलमासाद्य दशर्यामास जानकीम्।
नित्यावियोगिनीं देवीं रामो मन्ददृशामपि॥ १७॥
aśokamūlamāsādya darśayāmāsa jānakīm |
nityāviyoginīṁ devīṁ rāmo mandadṛśāmapi || 17||

हनुमत्पर्मुखैः साधर्ं देव्या च पुरुषोत्तमः।
आरुह्य पुष्पकं रामो जगाम नगरीं निजाम्॥ १८॥
hanumatpramukhaiḥ sārdhaṁ devyā ca puruṣottamaḥ |
āruhya puṣpakaṁ rāmo jagāma nagarīṁ nijām || 18||

भरतो भक्तिभरितो राममभ्येत्य निवृर्तः।
पपात पादयोस्तस्य कृष्णस्येव श्वफल्कजः॥ १९॥
bharato bhaktibharito rāmamabhyetya nirvṛtaḥ |
papāta pādayostasya kṛṣṇasyeva śvaphalkajaḥ || 19||

तमुत्थाप्य परिष्वज्य राघवोऽन्तःपुरं गतः।
सम्पूजितो जनैः सवैर्जर्ननीमभ्यवन्दत॥ २०॥
tamutthāpya pariṣvajya rāghavo'ntaḥpuraṁ gataḥ |
sampūjito janaiḥ sarvairjananīmabhyavandata || 20||

रामो राज्याभिषिक्तः सन् शशास जगतीं पर्भुः।
धमार्नशिक्षयत्पूणोर् बुभुजे सम्पदः सुखी॥ २१॥
rāmo rājyābhiṣiktaḥ san śaśāsa jagatīṁ prabhuḥ |
dharmānaśikṣayatpūrṇo bubhuje sampadaḥ sukhī || 21||

सनकादींश्च तद्वंश्यान् मुनीनन्यांश्च मारुतिः।
रामान्तिके शर्ुतिव्याख्याविशेषान् समशिक्षयत्॥ २२॥
sanakādīṁśca tadvaṁśyān munīnanyāṁśca mārutiḥ |
rāmāntike śrutivyākhyāviśeṣān samaśikṣayat || 22||

सुराणकांस्तमो नेतुं तत्याजेव स जानकीम्।
व्याप्तत्वान्निरवद्यत्वात् तस्यास्त्यागः कथं भवेत्॥ २३॥
surāṇakāṁstamo netuṁ tatyājeva sa jānakīm |
vyāptatvānniravadyatvāt tasyāstyāgaḥ kathaṁ bhavet || 23||

स्वात्मानं यज्ञपुरुषं यज्ञेनायजताथ सः।
ततर्ागता सती सीता वेद्यामन्तदर्धे किल॥ २४॥
svātmānaṁ yajñapuruṣaṁ yajñenāyajatātha saḥ |
tatrāgatā satī sītā vedyāmantardadhe kila || 24||

धमर्ं साङ्ख्यं च योगं च वतर्यामास राघवः।
पर्ावोचन्मरुतः सूनुः सम्पदो ननृतुस्तदा॥ २५॥
dharmaṁ sāṅkhyaṁ ca yogaṁ ca vartayāmāsa rāghavaḥ |
prāvocanmarutaḥ sūnuḥ sampado nanṛtustadā || 25||

पर्कृत्या परमा हंसा बर्ह्मणो मानसाः सुताः।
सनकाद्यास्ततः शर्ुत्वा व्याचख्युस्तत्त्वमञ्जसा॥ २६॥

prakṛtyā paramā haṁsā brahmaṇo mānasāḥ sutāḥ |
sanakādyāstataḥ śrutvā vyācakhyustattvamañjasā || 26||

नमो रामाय रामाय राम राम नमोऽस्तु ते।
रामः स्वामी गती राम इति लोका विचुकरुशुः॥ २७॥
namo rāmāya rāmāya rāma rāma namo'stu te |
rāmaḥ svāmī gatī rāma iti lokā vicukruśuḥ || 27||

देवो जिगमिषुधार्म स्वीयमभ्यथिर्तः सुरैः।
दुग्धाब्धिं पर्ययौ शेषो लक्ष्मणो रामचोदितः॥ २८॥
devo jigamiṣurdhāma svīyamabhyarthitaḥ suraiḥ |
dugdhābdhiṁ prayayau śeṣo lakṣmaṇo rāmacoditaḥ || 28||

समायात समायात ये ये मोक्षपदेच्छवः।
एवमाघोषयद्रामो दूतैदिर्क्षु समस्तशः॥ २९॥
samāyāta samāyāta ye ye mokṣapadecchavaḥ |
evamāghoṣayadrāmo dūtairdikṣu samastaśaḥ || 29||

अथोत्तरां दिशं देवः पर्तस्थे सह सीतया।
वानराद्यैनर्राद्यैरप्यसङ्ख्यैजर्न्तुभिवृर्तः॥ ३०॥
athottarāṁ diśaṁ devaḥ pratasthe saha sītayā |
vānarādyairnarādyairapyasaṅkhyairjantubhirvṛtaḥ || 30||

तेषां मोक्षपदं दत्वाऽभ्यनुज्ञाप्य मरुत्सुतम्।
राघवः सीतया साधर्ं विवेश स्वं परं पदम्॥ ३१॥
teṣāṁ mokṣapadaṁ datvā'bhyanujñāpya marutsutam |
rāghavaḥ sītayā sārdhaṁ viveśa svaṁ paraṁ padam || 31||

सत्येन भक्त्या च विरक्तिमत्या मत्या च धृत्या च तपस्यया च।
हा राम रामेति सदोपगायन् पर्ाभञ्जनिः किम्पुरुषेषु रेमे॥ ३२॥
satyena bhaktyā ca viraktimatyā matyā ca dhṛtyā ca tapasyayā ca |
hā rāma rāmeti sadopagāyan prābhañjaniḥ kimpuruṣeṣu reme || 32||

॥ इति श्रीमन्मणिमञ्जर्यां द्वितीयः सर्गः॥
|| iti śrīmanmaṇimañjaryāṁ dvitīyaḥ sargaḥ ||